पर्याय–शैक्षणिककार्ययोजना –2021–22

**नवमीकक्ष्या (IX Standard)** **नवेम्बर्मासः (November)**

| क्रम सङ्ख्या | मासः / सप्ताहः Month / week | अधिगमफलानि Learning out come | निर्देशात्मक क्रियाकलापाः Activity | मौल्यमापन– क्रियाकलापाः Evaluation activity |
|---|---|---|---|---|
| 1 | **नवेम्बर्मासः (November) –2021** | | | |
| | **प्रथमसप्ताहः (1st week)**<br>क्रियाकलापः–1 | **मूर्तिपूजारहस्यम् – गद्यम्**<br>❖ पाठस्य पठनम् ।<br>❖ मूर्तिपूजायाः महत्त्वम्।<br>❖ मूर्तिपूजायाः वर्णनम् । | ➢ आदर्शपुरुषाणां परिचयद्वारा भारतीय–संस्कृतेः परिचायनम् ।<br>➢ सांस्कृतिकमौल्यानां परिचयः। | ▪ स्पष्टतया पाठस्य पठनम्।<br>▪ आदर्शपुरुषाणां जीवनकथां सङ्गृह्णन्तु ।<br>▪ तेषां भावचित्राणि सङ्गृह्णन्तु । |
| | क्रियाकलापः–2 | ❖ संस्कृतेः परिचयः ।<br>❖ सगुणोपासनम्।<br>❖ निर्गुणोपासनम् ।<br>❖ उपासनायाः विधानम् महत्त्वञ्च । | ➢ सगुण–निर्गुण–ब्रह्मणः सामान्यपरिचयः ।<br>➢ निराकारवस्तुनः कल्पनाद्वारा ध्यानं कर्तुम् प्रेरणाप्रदानम् ।<br>➢ मूर्तौ दैवभावनां कल्पयितुं कथं सुकरमिति प्रत्यायनम् । | ▪ एतादृशीं कथां स्ववाक्यैः रचयन्तु । |
| | **द्वितीयसप्ताहः (2nd week)**<br>क्रियाकलापः–1 | ❖ **प्रयोगाः – व्याकरणपाठः ।**<br>❖ सामान्यवाक्यरचना–ज्ञानम् ।<br>❖ त्रिविधप्रयोगानां सामान्यपरिचयः । | ➢ मातृभाषायां स्थितवाक्यानां संस्कृते अनुवादः ।<br>➢ कर्तरि–कर्मणि–भावे प्रयोगाः सन्ति इति सोदाहरणपूर्वकं परिचायानम् । | ▪ कर्तृ–कर्म–क्रियापदयुक्त–लघुवाक्यानां संरचनम् । |
| | क्रियाकलापः–2 | ❖ प्रयोगे विद्यमानानां कर्तु–कर्मपदानां विभक्तिपरिचयः ।<br>❖ परस्मैपदि आत्मनेपदि क्रियापदानां ज्ञानम् । | ➢ पूर्वं तिङन्तप्रकरणे अधीत परस्मैपदि–आत्मनेपदि क्रियापदानाम् अभ्यासः कारयितव्यः । | ▪ क्रियापदानां परस्मैपदि–आत्मनेपदिषु लेखनम् । |
| | क्रियाकलापः–3 | ❖ कर्तरितः कर्मणि, कर्तरितः भावेप्रयोगे कीदृशव्यत्यासाः भवन्ति इति अवबोधनम् । | ➢ प्रयोगे कर्तृ–कर्मपदयोः विभक्तिव्यत्यासः कथं भवतीति प्रदर्शयेत् ।<br>➢ प्रयोगस्य तालिका प्रदर्शनीया । | ▪ कर्तरितः कर्मणि या भावे, कर्मणितः कर्तरि इति प्रयोगतालिकां कुर्वन्तु । |

| | | | | |
|---|---|---|---|---|
| | **तृतीयसप्ताहः (3rd week)** क्रियाकलापः–1 | **अनुवादाः – व्याकरणम् ।** ❖ यथाश्रुत–अनुवादहभावानुवादः । ❖ मौल्यानां प्रतिपादनम् । | ➢ मातृभाषायां स्थितवाक्यानां शब्दशः अनुवादः । ➢ भाषान्तरस्य वाक्यस्य भावं गृहीत्त्वा अनुवादः। | ▪ यथाश्रुतवाक्यानाम् अनुवादः कर्तव्यः । |
| | क्रियाकलापः–2 | ❖ भावानुवादस्य महत्त्वावबोधनम् । ❖ लघुवाक्यैः भावानुवादः । | ➢ अनुच्छेदं दत्त्वा तस्य भावानुवादं कर्तुं प्रेरयेत् । | ▪ भावानुवादं कर्तुं प्रयत्नः विधेयः । |
| | **चतुर्थः सप्ताहः (4th week)** क्रियाकलापः–1 | **दीपावलिः–गद्यपाठः ।** ❖ भारतीयसंस्कृतौ पर्वणां महत्त्वं प्रदर्शनीयम् । ❖ विविधपर्वणां विषये ज्ञानप्रदानम् । | ➢ पर्वणां नामानि लिखन्ति । ➢ राष्ट्रियपर्वणां धार्मिकपर्वणां च विभागं कुर्वन्तु । | ▪ विविधमतानुसारं पर्वणाम् तालिकां कुर्वन्तु । ▪ पर्वणां महत्त्वं लिखन्तु । |
| | क्रियाकलापः–2 | ❖ दिनत्रयात्मकः दीपावल्याः विषये सामान्यज्ञानप्रदानम् । ❖ नरकचतुर्दशी–बलिप्रतिपत्दिनयोः महत्त्वविषये कथाद्वारा ज्ञानप्रदानम् । | ➢ 'नरकचतुर्दशी' इति कथं नाम प्राप्तम् इति प्रदर्शयेत् । ➢ अस्मिन् पर्वणि श्रीकृष्णस्य पात्रविषये चर्चाद्वारा ज्ञानप्रबोधनम् । | ▪ नरकचतुर्दश्याः वैशिष्ट्यं लिखन्तु । ▪ श्रीकृष्ण–भूदेव्योः विषये अवगच्छन्तु । |
| | क्रियाकलापः–3 | ❖ अमावास्याः महत्त्वम् तथा लक्ष्मीपूजायाः वैशिष्ट्यस्य वर्णनम् । ❖ बलीन्द्रस्य कथायाः अवबोधनम् । | ➢ महालक्ष्मीपूजायाः महत्त्वम् अवगन्तुं छात्रान् प्रेरयेत् । ➢ प्रतिपदाचरणस्य विषये अधिकासक्तिं छात्रेषु उत्पादयेत् । | ▪ महालक्ष्म्याः विषये लघुप्रबन्धं या अनुच्छेदं लिखन्तु । ▪ विविधस्थलेषु आचर्यमाण बलिप्रतिपदः विषयान् सङ्गृह्णन्तु । |

**अभ्यासपत्रिका –1. दीपावलिः, प्रयोगाः च ।**

**सूक्त–उत्तरं चित्वा लिखत –**

1. आचार्यः अस्य महोत्सवस्य महत्त्वं वदति ।

   A. गणेशचतुर्थेः B. दीपावल्याः C. बक्रीदस्य D. क्रिस्मस्दिनस्य

2. चैत्रमासे – युगादिः :: भाद्रपदमासे – ----- अत्र चतुर्थपदं भवति।

   A. शिवरात्रिः B. नवरात्रिः C. नागपञ्चमी D. गणेशचतुर्थिः

3. क्रैस्तानां पर्वदिनमिदम् ।

A. कृष्णाष्टमी B. मोहरम् C. गुड्फ्रैडे D. ईद्मिलाद्

4. अनया पद्धत्या पर्वाणि आचर्यन्ते ।

A. दिनरीत्या B. मासरीत्या C. सौरमानरीत्या D. चन्द्रमानरीत्या

5. भारतीयेभ्यः नूतनवर्षारम्भः अस्मात् दिनात् भवति ।

A. युगादेः B. मकरसङ्क्रमणात् C. दीपावल्याः D. क्रिस्मस्दिनात्

6. एतावन्तः प्रयोगाः सन्ति ।

A. त्रयः B. चत्वारः C. पञ्च D. षट्

7. कर्तरि प्रयोगे कर्मपदम् अस्यां विभक्तौ भवति ।

A. प्रथमा B. द्वितीया C. तृतीया D. पञ्चन्मी

8. भावे प्रयोगे इदं पदं न भवति ।

A. क्रियापदम् B. कर्तृपदं C. कर्मपदं D. कृदन्तपदं

9. कर्तृपदं प्रथमाविभक्तौ अस्मिन् प्रयोगे भवति ।

A. कृदन्त B. कर्मणि C. भावे D. कर्तरि

10. कर्मणिप्रयोगे अस्य प्राधान्यं भवति ।

A. क्रियापदस्य B. कर्मपदस्य C. कर्तृपदस्य D. प्रातिपदिकस्य

**1. एकवाक्येन उत्तरं लिखत ।**

1. सर्वेभ्यः अतिसन्तोषदायकः उत्सवः कः?
2. दीपावलिपर्वणः तृतीयदिनं किमिति ख्यातम् ?
3. कर्तरिप्रयोगे कर्तृपदं किं विभक्त्यन्तं भवति ?
4. भावे प्रयोगे क्रियापदं कस्मिन् पुरुषे भवति ?
5. कस्मिन् प्रयोगे कर्मपदं प्रधानं भवति ?

**2. वाक्यदोषं परिहरत–**

1. अस्य दिने मम जन्मोत्सवः भवति ।
2. भगवान् श्रीकृष्णेन नरकासुरः हतः ।
3. वर्षे बहवः पर्वाणि जनाः आचरन्ति ।
4. सर्वेपि उपविशति ।

**3. लिङ्ग–विभक्ति–वचनानि लिखत ।**

1. प्रतिपदि 2. पर्वाणि 3. भगवता 4. मातरम्

**4. पर्यायपदानि लिखत ।**

1. आचार्यः 2. छात्रः 3. गृहम् 4. श्रीकृष्णः

**5. विग्रहवाक्यं विलिख्य समासनाम लिखत ।**

1. प्रजापीडकः 2. समुद्रमथनम् 3. दीपावलिः 4. बलिपूजा

**6. दीर्घम् उत्तरं लिखत ।**

1. दीपावलेः दिनत्रयं केन केन नाम्ना आचर्यते?

**7. प्रयोगपरिवर्तनं कुरुत–**

1. गणेशः चित्रं लिखति । 2. अहं गुरुं नमामि
3. राधया पाठः पठ्यते । 4. बालिकया जलं पीयते ।

***********

**<u>अभ्यासपत्रिका–2–</u> मूर्तिपूजारहस्यम्, अनुवादाः ।**

**सूक्तोत्तरचयनप्रश्नाः–**

1. 'यथा मे रोचते तथा करोमि' इदं वाक्यं एषः उक्तवान् ।

A. रामसिंहः B. विवेकानन्दः C. मानसिंहः D. मङ्गलसिंहः

2. सचिवः अस्य समानार्थकपदम् इदम् ।

A. पण्डितः B. भटः C. राजा D. अमात्यः

3. मानसिंहः अस्मिन् वेषे आगतवान् ।

A. स्वामी विवेकान्दस्य B. आखेटस्य C. सिंहस्य D. देवस्यस्

4. खेत्रीनरेशः अमुं प्रेषितवान् ।

A.स्वामी विवेकानन्दं B. मानसिंहं C. रामसिंहं D. देवम्

5. एषः द्वारे स्थित्वा स्वामिचरणान् प्रतिपालयति ।

A. खेत्री महाराजः B. रामसिंहः C. मानसिंहः D. मङ्गलसिंहः

6. एतस्य चित्रं सभालयस्य भित्तिगतम् अस्ति ।

A. श्रीरामकृष्णपरमहंसस्य B. सरस्वत्याः C. मङ्गलसिंहस्य D. महाराजस्य

7. देवतावतारे एतस्य दृढविश्वासः अस्ति ।

A. रामसिंहस्य B. मानसिंहस्य C. स्वामीविवेकानन्दस्य D. मङ्गलसिंहस्य

8. मानसिंहः – महाराजः :: विवेकानन्दः – ---- अत्र चतुर्थपदं भवति ।

A. सन्यासी B. महाधीरः C. यन्त्रिकः D. सचिवः

**1. एकवाक्येन उत्तरं लिखत ।**

1. कस्य सम्मानार्थं मङ्गलसिंहेन समारम्भः आयोजितः?
2. कस्य भावचित्रस्य थूत्कारं कर्तुं स्वामी विवेकानन्दः अवदत् ?
3. राज्ञः आस्थानं विवेकानन्दः केन प्रेषितः ?
4. मूर्तिपूजारहस्यं इति पाठस्य लेखकः कः ?

**2. यथानिर्देशं लिखत ।**

1. के नु खलु अमी स्वामिचरणाः ।

क: अवदत्? कम् अवदत्?

2. भिक्षाटनं मे रोचते इति कृत्वा भिक्षाटनं करोमि ।

क: पाठ:? कम् अवदत्?

3. अस्मिन् चित्रे थूत्क्रियताम् ।

क: पाठ:? क: अवदत्? कस्य चित्रे?

**3. सन्धिं कृत्वा नाम लिखत ।**

1. कर्गजे + अस्मिन् । 2. तत् + चित्रम् ।

3. कश्चित् + अपि । 4. सहसा + उत्थाय ।

**4. समस्तपदं लिखित्वा समासस्य नाम लिखत ।**

1. राज्ञः आगमनम् । 2. स्वामिनः चरणेषु ।

3. स्वस्थानम् आपन्नाः । 4. महान् च असौ राजा च ।

**5. लघूत्तरं लिखत ।**

1. प्रासादं प्राप्ता अपि स्वामिचरणाः किमर्थं सभां नालङ्कुर्वन्ति ?

2. विवेकानन्दः भिक्षाटनविषये मानसिंहं प्रति किम् उक्तवान्?

**6. मातृभाषायाम् अनुवादं कृत्वा लिखत ।**

1. नीलमेघः आकाशे सञ्चरति । मेघात् वृष्टिः भवति । वृष्ट्या भूमौ सस्यानि वर्धन्ते । पशवः सस्यानि भक्षयित्वा जीवन्ति ।

2. युष्माभिः सम्यक् अभ्यासः करणीयः । गुरोः मार्गदर्शनम् अनुसरत । श्वः शालायां परीक्षा प्रचलिष्यति । सम्यक् लिखित्वा उत्तीर्णाः भवत । उद्योगिनं पुरुषसिंहम् उपैति लक्ष्मीः ।

3. कृषीवलाः क्षेत्रे परिश्रमेण कृषिकार्यं कुर्वन्ति । तेषां गृहेषु कुक्कुटाः, सारमेयाः, गावः, च भवन्ति । शुनकः गृहं क्षेत्रं च चोरेभ्यः रक्षति । धेनुः मधुरं दुग्धं ददाति ।

4. आगामिवासरे सुधांशुः वैद्यकीयक्षेत्रे उन्नताध्ययनार्थं विदेशं प्रति गमिष्यति । तत्र वर्षत्रयं सम्यगधीत्य पुनरागमिष्यति । प्रतिग्रामं गत्वा आर्तान् सेविष्यते । यतः सेवा हि परमो धर्मः ।

*****************

**7. संस्कृतभाषायाम् अनुवादं कृत्वा लिखत ।**

1. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾರೆ. ಶಾಲೆಯಲ್ಲಿ ಅಧ್ಯಾಪಕರು ಪಾಠಗಳನ್ನು ಮಾಡುತ್ತಾರೆ. ವಿದ್ಯಾರ್ಥಿಗಳು ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸುತ್ತಾರೆ. ಜೀವನದಲ್ಲಿ ಸಫಲತೆಯನ್ನು ಪಡೆಯುತ್ತಾರೆ.

2. ಇದು ಸುಂದರವಾದ ಲಾಲ್‌ಬಾಗ್ ಉದ್ಯಾವನವಾಗಿದೆ. ಇದು ಕ್ರಿ.ಶ.18ನೇ ಶತಮಾನದಲ್ಲಿ ನಿರ್ಮಾಣವಾಯಿತು. ಬೆಳಿಗ್ಗೆ ಹಾಗೂ ಸಂಜೆ ನಗರವಾಸಿಗಳು ಇಲ್ಲಿ ಸಂಚರಿಸುತ್ತಾರೆ. ವಿಶ್ರಾಂತಿಯನ್ನು ಆರೋಗ್ಯವನ್ನು ಆನಂದವನ್ನು ಪಡೆಯುತ್ತಾರೆ.

3. ಹಿಂದೆ ಬಡವನೂ ಮೂರ್ಖನೂ ಆದ ಕಮಲಾಕರನೆಂಬ ಬಾಲಕನು ಇದ್ದನು. ಎಲ್ಲರೂ ಅವನನ್ನು ನೋಡಿ ಅಪಹಾಸ್ಯ ಮಾಡುತ್ತಿದ್ದರು. ಇದರಿಂದ ಅವಮಾನಿತನಾದ ಅವನು ಕಾಶಿಗೆ ಹೋಗಿ ಚೆನ್ನಾಗಿ ಓದಿ ಮಹಾಜ್ಞಾನಿಯಾದನು. ಆದ್ದರಿಂದ ಪ್ರಯತ್ನ ಪಟ್ಟರೆ ಅಸಾಧ್ಯವಾದುದು ಯಾವುದೂ ಇಲ್ಲ.

***********

## प्रश्नपत्रिका–

**Max. Marks : 10**

**1. सूक्त–उत्तरं चित्वा लिखत –** (3)

1. 'यथा मे रोचते तथा करोमि' इदं वाक्यं एषः उक्तवान् ।

A. रामसिंहः  B. विवेकानन्दः  C. मानसिंहः  D. मङ्गलसिंहः

2. सचिवः अस्य समानार्थकपदम् इदम् ।

A. पण्डितः  B. भटः  C. राजा  D. अमात्यः

3. चैत्रमासे – युगादिः :: भाद्रपदमासे – ----- अत्र चतुर्थपदं भवति।

A. शिवरात्रिः  B. नवरात्रिः  C. नागपञ्चमी  D. गणेशचतुर्थिः

**2. संस्कृतभाषया उत्तरं लिखत –** (3)

1. कस्य सम्मानार्थं मङ्गलसिंहेन समारम्भः आयोजितः?

--------------------------------------------------

--------------------------------------------------

2. सर्वेभ्यः अतिसन्तोषदायकः उत्सवः कः?

--------------------------------------------------

--------------------------------------------------

3. कर्तरिप्रयोगे कर्तृपदं किं विभक्त्यन्तं भवति ?

--------------------------------------------------

--------------------------------------------------

**3. मातृभाषया अनुवादं कुरुत ।** (2)

नीलमेघः आकाशे सञ्चरति । मेघात् वृष्टिः भवति । वृष्ट्या भूमौ सस्यानि वर्धन्ते । पशवः सस्यानि भक्षयित्वा जीवन्ति ।

--------------------------------------------------

--------------------------------------------------

--------------------------------------------------

**4. संस्कृतभाषायाम् अनुवादं कृत्वा लिखत ।** (2)

1. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾರೆ. ಶಾಲೆಯಲ್ಲಿ ಅಧ್ಯಾಪಕರು ಪಾಠಗಳನ್ನು ಮಾಡುತ್ತಾರೆ. ವಿದ್ಯಾರ್ಥಿಗಳು ಗುರುಗಳ ಮಾರ್ಗದರ್ಶನವನ್ನು ಅನುಸರಿಸುತ್ತಾರೆ. ಜೀವನದಲ್ಲಿ ಸಫಲತೆಯನ್ನು ಪಡೆಯುತ್ತಾರೆ.

--------------------------------------------------

--------------------------------------------------

--------------------------------------------------

**************